लोकप्रियसाहित्यग्रन्थमाला - 3

# आयतिः

## समकालिकसंस्कृतकाव्यानां सङ्ग्रहः

सम्पादकः

**राधावल्लभः**

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

## अनुक्रम :


| | | |
|---|---|---|
| 1. | भट्टमथुरानाथशास्त्री | 1 |
| 2. | वेङ्कटरामराघवः | 9 |
| 3. | जानकीवल्लभशास्त्री | 14 |
| 4. | बटुकनाथशास्त्री खिस्ते | 20 |
| 5. | रतिनाथ झा | 26 |
| 6. | अवस्थी बच्चूलालः | 38 |
| 7. | जगन्नाथ पाठकः | 48 |
| 8. | 'अभिराज'-राजेन्द्रमिश्रः | 53 |
| 9. | राधावल्लभः | 60 |

अधिकाधिकमुज्ज्वलं वहन्
ननु रूपं भवति प्रियः सताम्।
मुकुरः किल भूतिमर्दितः
सुजनो दुर्जनदुर्वचोऽर्दितः ॥5॥

कटुकूटवचो - निपीडितः
सुजनो दुर्नहनैः सुदुर्जनैः।
न भिनत्ति निसर्गसौरभं
घनघृष्टो हरिचन्दनो यथा ॥6॥[4]

प्रियमावहते हि विच्छलं
सुजनो हन्त न लक्षितोऽपि सन्।
मधुरं रसमुद्गिरत्यसौ
तिमिरेऽप्यारसिता हि शर्करा ॥7॥

परितः परितापितोऽपि सन्
सुजनो नोज्झति शीलमात्मनः।
रुचिमावहते समुज्ज्वलां
कमनीयः कनकाञ्चलो यथा ॥8॥[5]

अपि दुर्जनजालकीलितः
सुजनोऽनक्ति महत्त्वमात्मनः।
अशुचौ भवनेऽपि शारदः
शशदृद् व्यञ्जयते निजां रुचम्॥9॥

परिताम्यति नो, न गर्हते,
वहते नाऽपि रुषं, न बाधते।
अपि दुर्जनदुर्विचेष्टितैः
सुजनः स्वे हृदये हृणीयते ॥ 10 ॥

('वर्णिका' रूपेण व्रजभाषाप्रसिद्धेन 'कुण्डलिया' छन्दसा)–

''सज्जनमैत्री सन्ततं स्नेहभरं पुष्णाति।
क्रमशो वृद्धिमुपागता दोषानपि मुष्णाति॥

# राष्ट्रियसंस्कृतसंस्थानम्

**मानितविश्वविद्यालयः**

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी,

**नवदेहली**